શિવકૈલાસાષ્ટોત્તરશતનામાવલિઃ

ૐ શ્રીમહાકૈલાસશિખરનિલયાય નમોનમઃ
ૐ હિમાચલેન્દ્રતનયાવલ્લભાય નમોનમઃ
ૐ વામભાગકલત્રાર્ધશરીરાય નમોનમઃ
ૐ વિલસદ્દિવ્યકર્પૂરદિવ્યાભાય નમોનમઃ
ૐ કોટિકન્દર્પસદૃશલાવણ્યાય નમોનમઃ 5
ૐ રત્નમૌક્તિકવૈડૂર્યકિરીટાય નમોનમઃ
ૐ મંદાકિનીજલોપેતમૂર્ધજાય નમોનમઃ
ૐ ચારુશીતાંશુશકલશેખરાય નમોનમઃ
ૐ ત્રિપુણ્ડ્રભસ્મવિલસત્ફાલકાય નમોનમઃ
ૐ સોમપાવકમાર્તાણ્ડલોચનાય નમોનમઃ 10
ૐ વાસુકીતક્ષકલસત્કુણ્ડલાય નમોનમઃ
ૐ ચારુપ્રસન્નસુસ્મેરવદનાય નમોનમઃ
ૐ સમુદ્રોદ્ભૂતગરલકંધરાય નમોનમઃ
ૐ કુરંગવિલસત્પાણિકમલાય નમોનમઃ
ૐ પરશ્વધદ્વયલસદ્દિવ્યકરાબ્જાય નમોનમઃ 15
ૐ વરાભયપ્રદકરયુગલાય નમોનમઃ
ૐ અનેકરત્નમાણિક્યસુહારાય નમોનમઃ
ૐ મૌક્તિકસ્વર્ણરુદ્રાક્ષમાલિકાય નમોનમઃ
ૐ હિરણ્યકિંકિણીયુક્તકંકણાય નમોનમઃ
ૐ મંદારમલ્લિકાદામભૂષિતાય નમોનમઃ 20
ૐ મહામાતંગસત્કૃત્તિવસનાય નમોનમઃ
ૐ નાગેંદ્રયજ્ઞોપવીતશોભિતાય નમોનમઃ
ૐ સૌદામિનીસમચ્છાયસુવસ્ત્રાય નમોનમઃ
ૐ સિંજાનમણિમંજીરચરણાય નમોનમઃ
ૐ ચક્રાબ્જધ્વજયુક્તાંઘ્રિસરોજાય નમોનમઃ 25
ૐ અપર્ણાકુચકસ્તૂરીશોભિતાય નમોનમઃ
ૐ ગુહમત્તેભવદનજનકાય નમોનમઃ
ૐ બિડૌજોવિધિવૈકુણ્ઠસન્નુતાય નમોનમઃ
ૐ કમલાભારતીંદ્રાણીસેવિતાય નમોનમઃ
ૐ મહાપંચાક્ષરીમન્ત્રસ્વરૂપાય નમોનમઃ 30
ૐ સહસ્રકોટિતપનસંકાશાય નમોનમઃ
ૐ અનેકકોટિશીતંશુપ્રકાશાય નમોનમઃ
ૐ કૈલાસતુલ્યવૃષભવાહનાય નમોનમઃ
ૐ નંદીભૃંગીમુખાનેકસંસ્તુતાય નમોનમઃ
ૐ નિજપાદા.મ્બુજાસક્તસુલભાય નમોનમઃ 35

ૐ પ્રારબ્ધજન્મમરણમોચનાય નમોનમઃ
ૐ સંસારમયદુઃખૌઘભેષજાય નમોનમઃ
ૐ ચરાચરસ્થૂલસૂક્ષ્મકલ્પકાય નમોનમઃ
ૐ બ્રહ્માદિકીટપર્યન્તવ્યાપકાય નમોનમઃ
ૐ સર્વસહામહાચક્રસ્યન્દનાય નમોનમઃ 40
ૐ સુધાકરજગચ્છક્ષૂરથાંગાય નમોનમઃ
ૐ અથર્વઋગ્યજુસ્સામતુરગાય નમોનમઃ
ૐ સરસીરુહસંજાતપ્રાપ્તસારથયે નમોનમઃ
ૐ વૈકુણ્ઠસાયવિલસત્સાયકાય નમોનમઃ
ૐ ચામીકરમહાશૈલકાર્મુકાય નમોનમઃ 45
ૐ ભુજંગરાજવિલસત્સિજિનીકૃતયે નમોનમઃ
ૐ નિજાક્ષિજાગ્નિસન્દગ્ધ ત્રિપુરાય નમોનમઃ
ૐ જલંધરાસુરશિરચ્છેદનાય નમોનમઃ
ૐ મુરારિનેત્રપૂજાંઘ્રિપંકજાય નમોનમઃ
ૐ સહસ્રભાનુસંકાશચક્રદાઅય નમોનમઃ 50
ૐ કૃતાન્તકમહાદર્પનાશનાય નમોનમઃ
ૐ માર્કણ્ડેયમનોભીષ્ટદાયકાય નમોનમઃ
ૐ સમસ્તલોકગીર્વાણશરણ્યાય નમોનમઃ
ૐ અતિજવલજવાલામાલવિષઘ્નાય નમોનમઃ
ૐ શિક્ષિતાંધકદૈતેયવિક્રમાય નમોનમઃ 55
ૐ સ્વદ્રોહિદક્ષસવનવિઘાતાય નમોનમઃ
ૐ શંબરાંતકલાવણ્યદેહસંહારિણે નમોનમઃ
ૐ રતિપ્રાર્તિતમાંગલ્યફલદાય નમોનમઃ
ૐ સનકાદિસમાયુક્તદક્ષિણામૂર્તયે નમોનમઃ
ૐ ઘોરાપસ્મારદનુજમર્દનાય નમોનમઃ 60
ૐ અનન્તવેદવેદાન્તવેદ્યાય નમોનમઃ
ૐ નાસાગ્રન્યસ્તનિટિલનયનાય નમોનમઃ
ૐ ઉપમન્યુમહામોહભંજનાય નમોનમઃ
ૐ કેશવબ્રહ્મસંગ્રામનિવારાય નમોનમઃ
ૐ દ્રુહિણાંભોજનયનદુર્લભાય નમોનમઃ 65
ૐ ધર્માર્થકામકૈવલ્યસૂચકાય નમોનમઃ
ૐ ઉત્પત્તિસ્થિતિસંહારકારણાય નમોનમઃ
ૐ અનન્તકોટિબ્રહ્માણ્ડનાયકાય નમોનમઃ
ૐ કોલાહલમહોદારશમનાય નમોનમઃ
ૐ નારસિંહમહાકોપશરભાય નમોનમઃ 70
ૐ પ્રપંચનાશકલ્પાન્તભૈરવાય નમોનમઃ

ॐ હિરણ્યગર્ભોત્તમાંગચ્છેદનાય નમોનમઃ
ॐ પતંજલિવ્યાઘ્રપાદસન્નુતાય નમોનમઃ
ॐ મહાતાણ્ડવચાતુર્યપંડિતાય નમોનમઃ
ॐ વિમલપ્રણવાકારમધ્યગાય નમોનમઃ 75
ॐ મહાપાતકતૂલૌઘપાવનાય નમોનમઃ
ॐ ચંડીશદોષવિચ્છેદપ્રવીણાય નમોનમઃ
ॐ રજસ્તમસ્સત્ત્વગુણગણેશાય નમોનમઃ
ॐ દારુકાવનમાનસ્ત્રીમોહનાય નમોનમઃ
ॐ શાશ્વતૈશ્વર્યસહિતવિભવાય નમોનમઃ 80
ॐ અપ્રાકૃતમહાદિવ્યવપુસ્થાય નમોનમઃ
ॐ અખંડસચ્ચિદાનન્દવિગ્રહાય નમોનમઃ
ॐ અશેષદેવતારાધ્યપાદુકાય નમોનમઃ
ॐ બ્રહ્માદિસકલદેવવન્દિતાય નમોનમઃ
ॐ પૃથિવ્યપ્તેજોવાય્વાકાશતુરીયાય નમોનમઃ 85
ॐ વસુન્ધરમહાભારસૂદનાય નમોનમઃ
ॐ દેવકીસુતકૌન્તેયવરદાય નમોનમઃ
ॐ અજ્ઞાનતિમિરધ્વાન્તભાસ્કરાય નમોનમઃ
ॐ અદ્વૈતાનન્દવિજ્ઞાનસુખદાય નમોનમઃ
ॐ અવિદ્યોપાધિરહિતનિર્ગુણાય નમોનમઃ 90
ॐ સપ્તકોટિમહામન્ત્રપૂરિતાય નમોનમઃ
ॐ ગંધશબ્દસ્પર્શરૂપસાધકાય નમોનમઃ
ॐ અક્ષરાક્ષરકૂટસ્થપરમાય નમોનમઃ
ॐ ષોડશાબ્દવયોપેતદિવ્યાંગાય નમોનમઃ
ॐ સહસ્રારમહાપદ્મમણ્ડિતાય નમોનમઃ 95
ॐ અનન્તાનન્દબોધાંબુનિધિસ્થાય નમોનમઃ
ॐ અકારાદિક્ષકારાન્તવર્ણસ્થાય નમોનમઃ
ॐ નિસ્તુલૌદાર્યસૌભાગ્યપ્રમત્તાય નમોનમઃ
ॐ કૈવલ્યપરમાનન્દનિયોગાય નમોનમઃ
ॐ હિરણ્યજ્યોતિવિભ્રાજત્સુપ્રભાય નમોનમઃ 100
ॐ જ્યોતિષાંમૂર્તિમજ્યોતિરૂપદાય નમોનમઃ
ॐ અનૌપમ્યમહાસૌખ્યપદસ્થાય નમોનમઃ
ॐ અચિંત્યમહિમાશક્તિરંજિતાય નમોનમઃ
ॐ અનિત્યદેહવિભ્રાંતિવર્જિતાય નમોનમઃ
ॐ સકૃત્પ્રપન્નદૌર્ભાગ્યચ્છેદનાય નમોનમઃ
ॐ ષટ્ત્રિંશત્તત્ત્વપ્રશાદભુવનાઅય નમોનમઃ
ॐ આદિમધ્યાન્તરહિતદેહસ્થાય નમોનમઃ

ૐ પરાનન્દસ્વરૂપાર્થપ્રબોધાય નમોનમઃ
ૐ જ્ઞાનશક્તિક્રિયાશક્તિસહિતાય નમોનમઃ
ૐ પરાશક્તિસમાયુક્તપરેશાય નમોનમઃ 110
ૐ ઓંકારાનન્દનોદ્યાનકલ્પકાય નમોનમઃ
ૐ બ્રહ્માદિસકલદેવવન્દિતાય નમોનમઃ 112
શ્રી મહાકૈલાસાષ્ટોત્તરશતનામાવલિઃ સંપૂર્ણા